|| শ্রীদশাবতারস্তোত্রম ||

নমোঽস্তু নারায়ণমংদিরায় নমোঽস্তু হারায়ণকংধরায়|
নমোঽস্তু পারায়ণচর্চিতায় নমোঽস্তু নারায়ণ তেঽর্চিতায় || ১ ||

নমোঽস্তু মৎস্যায় লয়াব্ধিগায় নমোঽস্তু কূর্মায় পয়োব্ধিগায়|
নমো বরাহায় ধরাধরায় নমো নৃসিংহায় পরাৎপরায় || ২ ||

নমোঽস্তু শক্রাশ্রয়বামনায় নমোঽস্তু বিপ্রোৎসবভার্গবায়|
নমোঽস্তু সীতাহিতরাঘবায় নমোঽস্তু পার্থস্তুতয়াদবায় || ৩ ||

নমোঽস্তু বুদ্ধায় বিমোহকায় নমোঽস্তু তে কল্কিপদোদিতায়|
নমোঽস্তু পূর্ণামিতসদ্গুণায় নমোঽস্তু নাথায় হয়াননায় || ৪ ||

করস্থশংখোল্লসদক্ষমালাপ্রবোধমুদ্রাভয়পুস্তকায়|
নমোঽস্তু বক্ত্রোদ্গিরদাগমায় নিরস্তহেয়ায় হয়াননায় || ৫ ||

রমাসমাকারচতুষ্টয়েন ক্রমাচ্চতুর্দিক্ষু নিষেবিতায়|
নমোঽস্তু পার্শ্বদ্বয়গদ্বিরূপশ্রিয়াঽভিষিক্তায় হয়াননায় || ৬ ||

কিরীটপট্টাংগদহারকাংচীসুরত্নপীতাংবরনূপুরাদ্যৈঃ|
বিরাজিতাংগায় নমোঽস্তু তুভ্যং সুরৈঃ পরীতায় হয়াননায় || ৭ ||

বিদোষকোটীংদুনিভপ্রভায বিশেষতো মধ্বমুনিপ্রিয়ায়|

বিমুক্তবংদ্যায় নমোঽস্তু বিশ্বশ্বিধৃতবিঘ্নায় হয়াননায় || ৮ ||

নমোঽস্তু শিষ্টেষ্টদবাদিরাজকৃ তাষ্টকাভিষ্টুতচেষ্টিতায় |
দশাবতারৈস্ত্রিদশার্থদায় নিশেশবিংবস্থহয়াননায় || ৯ ||

|| ইতি শ্রীবাদিরাজতীর্থশ্রীচরণবিরচিতং দশাবতারস্তোত্রম ||